## आद्युदात्तं द्व्यच् छन्दसि । (११९/३८५३)

यदाद्युदात्तं द्व्यच्[1] उत्तरपदं बहुव्रीहौ समासे सोरुत्तरं तदाद्युदात्तमेव भवति छन्दसि विषये । 'स्वश्वास्त्वा सुरथा मर्जयेम' (तै. सं. १.२.१४.४) । नित्स्वरेण अश्वरथशब्दावाद्युदात्तौ । आद्युदात्तमिति किम् ? 'या सुबाहुः स्वङ्गुरिः' (ऋ. २.३२.७) । बाहुशब्दः प्रत्ययस्वरेणान्तोदात्तः । द्व्यच् इति किम् ? [2]सुगुरसत् । सुहिरण्यः[3] । 'नञ्सुभ्याम्' (६.२.१७२/३९०६) इत्यस्यायमपवादः ॥

## वीरवीर्यौ च । (१२०/३८५४)

[4]वीर वीर्य इत्येतौ च शब्दौ सोरुत्तरौ बहुव्रीहौ समासे छन्दसि [5]विषये आद्युदात्तौ भवतः । 'सुवीरस्ते' (ऋ. ४.१७.४) । 'सुवीर्यस्य पतयः स्याम' (तै. सं. १.७.१३.४) । वीर्यमिति यत्प्रत्ययान्तं तत्र 'यतोऽनावः' (६.१.१२३/३७०१) इति आद्युदात्तत्वं न भवति इत्येतदेव वीर्यग्रहणं ज्ञापकम् । तत्र हि सति पूर्वेणैव सिद्धं स्यात् ॥

## कूलतीरतूलमूलशालाक्षसममव्ययीभावे । (१२१/३८५५)

कूल तीर तूल मूल शाला अक्ष सम इत्येतानि उत्तरपदानि अव्ययीभावसमासे आद्युदात्तानि भवन्ति । [6]परिकूलम् । उपकूलम् । परितीरम् । उपतीरम् । परितूलम् । उपतूलम् । परिमूलम् । उपमूलम् । परिशालम् । उपशालम् । पर्यक्षम् । उपाक्षम् । सुषमम् । विषमम् । निषमम् । दुःषमम् । तिष्ठद्गु-प्रभृतिषु (२.१.१७/६७१) एते पठ्यन्ते । कूलादिग्रहणं किम् ? उपकुम्भम् । अव्ययीभावे इति किम् ? परम-कूलम् । उत्तमकूलम् । पर्यादिभ्यः कूलादीनामाद्युदात्तत्वं विप्रतिषेधेन भवति । परिकूलम् । उपकूलम् ॥

## कंसमन्थशूर्पपाय्यकाण्डं द्विगौ । (१२२/३८५६)

कंस मन्थ शूर्प पाय्य काण्ड इत्येतानि उत्तरपदानि द्विगौ समासे आद्युदात्तानि भवन्ति । द्विकंसः । त्रिकंसः । द्विमन्थः । त्रिमन्थः । द्विशूर्पः । त्रिशूर्पः । द्विपाय्यः । त्रिपाय्यः । द्विकाण्डः । त्रिकाण्डः । द्विगौ इति किम् ? परमकंसः । [7]उत्तमकंसः ॥

## तत्पुरुषे शालायां नपुंसके । (१२३/३८५७)

शालाशब्दान्ते[8] तत्पुरुषे समासे नपुंसकलिङ्गे उत्तरपदमाद्युदात्तं भवति । ब्राह्मणशालम् । क्षत्रियशालम् । 'विभाषा सेनासुराच्छायाशालानिशानाम्' (२. ४. २५ / ८२८) इति नपुंसकलिङ्गता । तत्पुरुषे इति किम् ? दृढशालं ब्राह्मणकुलम् । शालायाम् [10]इति किम् ? ब्राह्मणसेनम् । नपुंसके इति किम् ? ब्राह्मण-शाला ॥

---

1. च इत्यधिकम् फ. 2. उदाहरणमिदं नास्ति ह. 3. स्वश्वः इत्यधिकम् क. ड. 4. छन्दसि इत्येव इत्यधिकम् ह. 5. विषये नास्ति फ. 6. परिकूलम् नास्ति फ. 7. उत्तमकंसः नास्ति फ. ह. 8. उपपदे इत्यधिकम् फ. 9. इति नास्ति